# केन्द्रीय माध्यमिक शिक्षा बोर्ड मूल्याङ्कन प्रक्रिया
## अक्तूबर-मार्च ( 2010 ) द्वितीय सत्रम्
## संस्कृतम् ( सम्प्रेषणात्मकम् ) 122

पूर्णांक : 80

## नवमी कक्षा
## सततं व्यापकम् मूल्याङ्कनम् ( द्वितीय सत्रम् )

2. संकलनात्मकमूल्याङ्कनाय परीक्षणपत्रम्(सितम्बरमासे) । परीक्षणपत्रे चत्वारः खण्डाः भविष्यन्ति–

'क' खण्डः अपठित–अवबोधनम् (15%)

'ख' खण्डः रचनात्मक–कार्यम् (15%)

'ग' खण्डः अनुप्रयुक्त–व्याकरणम् (35%)

'घ' खण्ड : पठित-अवबोधनम् (35%)

**खण्डानानुसारं विषयाः मूल्याभारःच**

| खण्डः | विषयाः | प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | मूल्यभारः |
|---|---|---|---|---|
| 'क' | अपठित–अवबोधनम् | | | |
| (i) | पठनावबोधनम् | बहुविकल्पात्मकाः (MCQ) | 2 | 4 |
| (ii) | अनुच्छेदद्वयम् | लघूत्तरात्मकाः (SA) | 2 | 8 |
| | | कुल भार | | 12 |
| 'ख' | रचनात्मक–कार्यम् | | | |
| (i) | अनौपचारिकं पत्रम् | निबन्धात्मकः | 1 | 4 |
| (ii) | चित्रवर्णनम्/अनुच्छेदलेखनम् वा | | 1 | 8 |
| | | कुल भार | | 12 |
| 'ग' | अनुप्रयुक्तव्याकरणम् | | | |
| (i) | हलन्त–शब्द–रूपाणि | बहुविकल्पात्मकाः (MCQ) | 8 | 16 |
| (ii) | धातु–रूपाणि (लोट्–विधिः) | लघूत्तरात्मकाः | 6 | 12 |
| (iii) | उपपदविभक्तयः | | | |
| (iv) | प्रत्ययाः | | | |
| | | कुल भार | | 28 |
| 'घ' | पठित–अवबोधनम् | | | |
| (i) | गद्यांश–पद्यांश–नाट्यांशाः | बहुविक्लपात्मकाः (MCQ) | 6 | 12 |
| (ii) | श्लोकान्वयः | | | |
| (iii) | प्रश्न–निर्माणम् | लघूत्तरात्मकाः | 6 | 12 |
| (iv) | कथाक्रमः | | | |
| (v) | शब्दार्थमेलनम् | निबंधात्मकाः | 1 | 4 |
| | | कुल भार | | 28 |

**सम्पूर्णभारः 80**

**टिप्पणी–प्रश्नपत्रम् अशीति-अङ्कानां भविष्यति**

# आदर्श प्रश्न पत्र

## 5. संस्कृतम् ( सम्प्रेषणात्मकम् ) 122

### नवमी कक्षा द्वितीय सत्रम्

**प्र.सं.** **प्रश्न पत्र** **अंक**

**खण्डः- ( क ) अपठित-अवबोधनम्.** **12 अङ्काः**

1. **अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारम् उत्तरपुस्तिकायां लिखत।** 4

( क ) कर्तव्यपालनम् एव मनुष्याणां परमः धर्मः अस्ति। प्रकृतेः तत्त्वानि अपि निःस्वार्थभावेन निरपेक्षभावेन च स्वकर्तव्यं पालयन्ति। यथा- सूर्यः प्रतिदिनं यथासमयम् उदयम् अस्तं च गच्छति। पवनः रात्रिन्दिवं वहति। इयं पृथिवी अपि अनवरतं स्वकक्षायां भ्रमति। एवमेव सर्वैः मानवैः अपि स्वकीयं निर्धारितं कर्म सदैव पूर्णया निष्ठया करणीयम्। अनेनैव तेषां सम्पूर्णः विकासः भविष्यति। अथ च अयं समाजः देशश्च भ्रष्टाचारमुक्तः भूत्वा उन्नतिपथे अग्रसरः भविष्यति।

**प्रश्नाः**

**I. एकपदेन उत्तरत -** ½×2= 1

(i) मनुष्याणां परमः धर्मः कः?

(ii) का स्वकक्षायाम् अनवरतं भ्रमति?

**II. पूर्णवाक्येन उत्तरत -** 1×2= 2

(i) मानवैः स्वकीयं कर्म कथं करणीयम्?

(ii) सूर्यः प्रतिदिनं किं करोति?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** ½x2= 1

(i) ''अनेन तेषां सम्पूर्णः .................'' अत्र 'तेषाम् इति सर्वनामपदं केभ्यः प्रयुक्तम्?

(अ) मानवेभ्यः (ब) स्वकीयेभ्यः

(स) कर्मभ्यः (द) निर्धारितेभ्यः

(ii) ''स्वार्थभावनया'' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(अ) निरपेक्षभावेन (ब) निष्ठया

(स) स्वकक्षायाम् (द) निःस्वार्थभावेन

( ख ) विद्या एव मानवस्य वास्तविकं चक्षुः भवति। अनया एव मानवः उचितम् अनुचितं, करणीयम्-अकरणीयं, ग्राह्यं-त्याज्यं वा इति सम्यक् निर्णयं कर्तुं शक्नोति। प्रतिष्ठिते कुले उत्पन्नः रूपयौवनसम्पन्नः जनः अपि

यदि विद्यया हीनः भवति तदा समाजे सः सम्मानं न प्राप्नोति। विद्यया एव सः विविधविधं ज्ञानं प्राप्य आत्मनः समाजस्य च उत्थानं करोति लोके धनं कीर्तिं च विन्दति। विद्यया एव मानवः विनम्रता योग्यता वैभवं सुखं च लभते। विद्या मनुष्यस्य सदा मातेव रक्षां करोति पितेव हिते नियोजयति। अत एव उच्यते– किं किं न साधयति कल्पलतेव विद्या। 8

**प्रश्नाः**

**I. एकपदेन उत्तरत।** 1×2= 2

(i) का सदा मातेव रक्षति ?

(ii) विद्याविहीनः नरः कुत्र सम्मानं न प्राप्नोति?

**II. पूर्णवाक्येन उत्तरत।** 2×1= 2

(i) विद्यया एव मानवः किं कर्तुं शक्नोति?

**III. गद्यांशस्य समुचितं शीर्षकं लिखत।** 2

**IV. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तंविकल्पेभ्यः चित्वा लिखत।** ½×4= 2

(i) ''नियोजयति'' इति क्रियापदस्य कर्तृपदं किम्?

(अ) पितेव (ब) विद्या

(स) हिते (द) मातेव

(ii) 'लभते' इति क्रियापदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(अ) विन्दति (ब) प्राप्य

(स) शक्नोति (द) प्रतिष्ठिते

(iii) 'रूपयौवनसम्पन्नः'' इति विशेषणपदस्य विशेष्यपदं किम्?

(अ) उत्पन्नः (ब) हीनः

(स) जनः (द) आत्मः

(iv) ''विद्यया एव सः विविधविधं ............'' अत्र ''सः'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) ज्ञानाय (ब) समाजाय

(स) सम्मानाय (द) जनाय

**खण्डः– 'ख' ( रचनात्मक लेखनम् )** पतञ्जलि छात्रावासः **12 अङ्काः**

**2.** **भवती शिवाली अस्ति। भवत्याः भ्रातुः भावुकस्य जन्मदिवसावसरे लिखिते अस्मिन् वर्धापनपत्रे मञ्जूषायाः उचितपदानि चित्वा रिक्तस्थानानि पूरयत उत्तरपुस्तिकायां च पुनः लिखत।** 4

(1) ...................

तिथिः .................

प्रिय (2)...........,

चिरं जीव !

अहमत्र कुशलिनी अस्मि, तव च कुशलताम् इच्छन्ती तुभ्यम् जन्मदिवसस्य हार्दिकीः शुभकामनाः प्रेषयामि। ईश्वरः तुभ्यं दीर्घायुं यच्छतु। जीवने सर्वविधं सुखं (3) ..................................। सर्वत्र सफलतां प्राप्नुहि।

अद्य तव जन्मदिवसे मया त्वया सह भवितव्यम् परन्तु मम (4)........................ आरब्धाः। अस्मात् कारणात् गृहम् न आगता।

मह्यम् लिखतु यत् त्वया एषः विशिष्टः अवसरः कथं मानितः? किम् त्वम् मित्रैः सह कुत्रापि भ्रमणाय अगच्छः अथवा गृहे यज्ञहोमादिकं कृत्वा केककर्तनम् कृतम् मातापितृभ्याम् च बहवः आशीर्वादाः (5) ..................................!

अस्य मासस्य अन्तिमसप्ताहे परीक्षासमाप्तेः (6) ................................. गृहमागत्य तुभ्यम् जन्मदिवसस्य उपहारम् दास्यामि। अनुमीयताम् यत् त्वदर्थम् कः उपहारः मत्पार्श्वे वर्तते। ज्ञातुम् इच्छसि किम्? मया तव 'क्रिकेट' इति प्रियक्रीडायाः सम्पूर्णा सामग्री (7) ..............। मातापितृभ्याम् मम प्रणामान् कथय।

तव (8) .............. भगिनी

शिवाली

**मञ्जूषा**

| |
|---|
| वार्षिकपरीक्षाः, भावुक, क्रीता, प्राप्ताः, लभस्व, नवदिल्लीतः, अनन्तरम्, स्नेहमयी, |

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

3. **अधः प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया चत्वारि वाक्यानि लिखत।** 2×4= 8



**मञ्जूषा**

बालिका, टोपिकाम्, हरितम्, वृक्षाः, उन्नताः, धावन्ति, पादप्रहारं करोति, प्रसन्नाः, सुन्दरम्, उद्यानम्, धारयति, शाद्वलम्, कन्दुकेन, तीव्रगत्या, पादकन्दुकक्रीडा

**अथवा**

**'मम प्रियः अध्यापकः' इति विषयम् अधिकृत्य चत्वारि वाक्यानि लिखत। सहायतायै मञ्जूषायां पदानि दत्तानि।** 2×4= 8

**मञ्जूषा**

राष्ट्रियपुरस्कारम्, कुर्वन्ति, प्रशंसाम्, विद्वान्, संस्कृताध्यापकः, आदर्शः, आदरम्, मृदुभाषी, व्यवहारः, स्नेहेन, श्रेष्ठवक्ता, अन्यैः अध्यापकैः सह, अनुशासनप्रियः, यथासमयम्, प्राप्तवान्, पाठयति, परीक्षापरिणामः, शोभनः

## खण्डः– 'ग' (अनुप्रयुक्त-व्याकरणम्) 28 अङ्काः

4.

**(क) प्रदत्तविकल्पेभ्यः उचितं शब्दरूपं चित्वा रिक्तस्थानानि पूरयत।** ½×4= 2

(i) प्रजाजनाः ................ सादरं नमन्ति।

(अ) राज्ञाम् (ब) राजानाम्

(स) राजानम् (द) राज्ञा

(ii) विद्यालयस्य वार्षिकोत्सवे आगमनाय ................. प्रार्थये।

(अ) भवतस्य (ब) भवन्तम्

(स) भवति (द) भवताम्

(iii) जनः सत्यनिष्ठया परिश्रमेण च .................................. उद्धारं कुर्यात्।

(अ) आत्मनः (ब) आत्मस्य

(स) आत्मानम् (द) आत्मा

(iv) संसारे .................................. सर्वत्र सम्मानं लभन्ते।

(अ) विदुषः (ब) विद्वांसः

(स) विदुषाम् (द) विद्वान्

**(ख) कोष्ठके दत्तशब्देषु उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।** 1×2= 2

(i) मार्गे .................................. बालकौ परस्परं वार्तालापं कृतवन्तौ। (गच्छत्)

(ii) अद्य अहम् ............................ गृहम् अवश्यम् आगमिष्यामि।। (भवत्)

5.

**(क) प्रदत्तविकल्पेभ्यः उचितं संख्यावाचकं पदं चित्वा वाक्यानि पूरयत।** ½×4= 2

(i) .................................. वने एकः तापसः कठिनं तपः करोति स्म।

(अ) एके (ब) एकस्मिन्

(स) एक (द) एकः

(ii) जनाः .................................. नेत्राभ्याम् दृष्ट्वा चलन्तु।

(अ) द्वे (ब) द्वयोः

(स) द्वेभ्याम् (द) द्वाभ्याम्

(iii) .................................. बालिकाः विद्यालयात् गृहम् आगच्छन्ति।

(अ) त्रीणि (ब) तिस्रः

(स) त्रयः (द) तिसृः

**(iv)** अहम् ................................ वेदान् पठितुम् इच्छामि।

(अ) चत्वारि (ब) चतुरान्

(स) चत्वारः (द) चतुरः

**(ख) कोष्ठके प्रदत्तानाम् संख्यावाचकशब्दानाम् उचितरूपं प्रयुज्य वाक्यानि पूरयत।** 1×2= 2

(i) हस्ते ................................ अङ्गुल्यः भवन्ति। (पञ्चन्)

(ii) ........................ विडाली प्रतिदिनम् मम गृहम् आगच्छति। (एक)

**6. अधोलिखितेषु वाक्येषु प्रदत्तविकल्पेभ्यः लोट्लकारस्य उचितम् क्रियापदं प्रयुज्य वाक्यं पुनः लिखत।** ½×4= 2

(i) वयम् सर्वे सुखिनः ................................।

(अ) भवन्तु (ब) भवत

(स) भवतु (द) भवाम

(ii) यूयम् सर्वाः बालिकाः स्वपितरौ ................................।

(अ) सेवताम् (ब) सेवन्ताम्

(स) सेवस्व (द) सेवध्वम्

(iii) राष्ट्रे सर्वे जनाः सुखं ................................।

(अ) लभताम् (ब) लभन्ताम्

(स) लभेत (द) लभन्तु

(iv) विद्वद्भ्यः वेदानां पठनं ................................।

(अ) रोचताम् (ब) रोचेताम्

(स) रोचन्ताम् (द) रोचस्व

**7.**

**(क) अधोलिखितेषु वाक्येषु प्रदत्तविकल्पेभ्यः विधिलिङ्लकारस्य उचितम् क्रियापदं प्रयुज्य वाक्यं पुनः लिखत।** ½×4= 2

(i) वयम् शोभनम् सात्त्विकं च आहारं ................................।

(अ) भक्षेम (ब) भक्षयेयम्

(स) भक्षयेम (द) भक्षयन्तु

(ii) बालका: स्वगृहे क्रीडन्त: ................................।

(अ) मोदेत (ब) मोदेताम्

(स) मोदेरन् (द) मोदेयु:

(iii) मातापितरौ शिशूनां पालनं कर्तुम् ................................।

(अ) शक्नुयातम् (ब) शक्नुयात्

(स) शक्नुयाताम् (द) शक्नुयु:

(iv) युवाम् गुरो: गरिमाणं ................................।

(अ) जानीयाताम् (ब) जानीयात्

(स) जानीयातम् (द) जानीयु:

**(ख) कोष्ठके प्रदत्तधातूनां समुचितं रूपं प्रयुज्य वाक्यानि पूरयित्वा पुनः लिखत।** 1x2= 2

(i) नववर्षम् तुभ्यम् शुभं ................................। अस् विधिलिङ्

(ii) भक्ता: नित्यं ईश्वरं ............... । भज् लोट्

8.

**(क) प्रदत्तविकल्पेभ्य: उचितानि पदानि चित्वा वाक्यानि पूरयत।** ½×8= 4

(i) ................................ निकषा नदी वहति।

(अ) ग्रामम् (ब) ग्रामस्य

(स) ग्रामेण (द) नगरम्

(ii) ................................ समया एक: ग्राम: अस्ति।

(अ) नगरेण (ब) नगरात्

(स) नगरस्य (द) नगरम्

(iii) ................................ विना जन: सफलतां न प्राप्नोति।

(अ) परिश्रमस्य (ब) परिश्रम:

(स) परिश्रमेण (द) परिश्रमे

(iv) अलम् ................................। अधुना स्वगृहं गच्छ।

(अ) विवादात् (ब) विवादेन

(स) विवादम् (द) विवादस्य

(v) रामः ................................... अलम्।

(अ) रावणात् (ब) रावणस्य

(स) रावणाय (द) रावणम्

(vi) क्रीडाप्रतियोगिताः ................................... आरब्धाः।

(अ) सोमवासरम् (ब) सोमवासरे

(स) सोमवासरात् (द) सोमवासरः

(vii) ................................... कालिदासः श्रेष्ठः मन्यते।

(अ) कविभ्याम् (ब) कविभ्यः

(स) कविम् (द) कवीनाम्

(viii) माता ................................... स्निह्यति।

(अ) पुत्रेण (ब) पुत्रस्य

(स) पुत्रे (द) पुत्रम्

9. **मञ्जूषातः उचितानि पदानि चित्वा वाक्यानि पूरयत-** 1×4= 4

सौम्या - सुप्रभातम्! प्रातः एव कुत्र गच्छसि?

रश्मि - अहम् भ्रमणाय ............... प्रति गच्छामि!

सौम्या - तत्र तु एकः तडागः अपि वर्तते! किम् तस्मिन् कमलानि विकसन्ति?

रश्मि - आम् तस्मिन् तडागे सुन्दराणि कमलानि विकसन्ति।

.................. हीनः तडागः तु न शोभते! अहं नित्यं तत्र भ्रमणम् करोमि।

सौम्या - .................. अनन्तरं कदा गृहम् आगच्छसि?

रश्मि - अहम् सप्तवादने गृहमागत्य ईशवन्दनां करोमि।

सौम्या - शोभनम्! मम अपि .................. दृढः विश्वासः अस्ति।

**मञ्जूषाः**

| कमलैः, ईश्वरे, उद्यानम्, भ्रमणात् |
|---|

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

10

**(क) प्रदत्तविकल्पेभ्यः उचितम् प्रत्ययान्तं पदं चित्वा रिक्तस्थानानि पूरयत।** ½×8= 4

(i) वानरेण कदलीफलानि ..................................।

(अ) खादितम् (ब) खादितानि

(स) खादितः (द) खादितेन

(ii) एकस्मिन् तरौ हंसः काकः च निवासं ..................................।

(अ) कृतवान् (ब) कृतवन्तौ

(स) कृतवती (द) कृतवतः

(iii) एकदा पर्णानाम् उपरि .................................. जलबिन्दवः मधुरं सङ्गीतं जनयन्ति स्म।

(अ) पतन्तः (ब) पतन्ति

(स) पतन् (द) पततः

(iv) पितरम् .................................. बालः धन्यः अस्ति।

(अ) सेवान (ब) सेवमानम्

(स) सेवमानः (द) सेवामानः

(v) कालिदासेन सप्तग्रन्थाः ..................................।

(अ) रचितेन (ब) रचिताः

(स) रचितानि (द) रचिताम्

(vi) वसुधा ग्रन्थान् ..................................।

(अ) पठितवान् (ब) पठितवती

(स) पठितवत्यः (द) पठितवति

(vii) .................................. सभाजनान् दृष्ट्वा अष्टावक्रः अपि उच्चैः अहसत्।

(अ) हसन्तः (ब) हसन्तान्

(स) हसतः (द) हसतान्

(viii) गृहं .................................. नार्यः प्रसन्नाः दृश्यन्ते।

(अ) गच्छन् (ब) गच्छन्ती

(स) गच्छन्त्यः (द) गच्छन्तीः

| प्र.सं. | प्रश्न | | अंक |
|---|---|---|---|

(ख) **कोष्ठके दत्तानाम् प्रत्ययान्तपदानाम् उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।** 1×2= 2

(i) चलचित्रम् .................................. बालः मोदते। (दृश् + शतृ)

(ii) मया रामायणम् बहुवारम् ..................................। (पठ् + क्त)

**खण्डः- 'घ' (पठित-अवबोधनम्)** **28 अङ्काः**

11. **अधोलिखितं गद्यांशं पद्यांशं नाट्याशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।** 4×3= 12

(अ) **गद्यांशः**

एकदा असौ मुनिः क्वापि नगरे एकं ब्राह्मणगृहम् एत्य तद्गृहिणीं भिक्षामयाचत। सा पतिव्रता गृहिणी तमवदत्– ''प्रतीक्षस्व क्षणं यावत् भर्तुः परिचर्यां समापये'' इति। एतत् श्रुत्वा स मुनिः तां कोपदृष्ट्या दृष्टवान्। सा विहस्य अभाषत– ''मुने! न अहं बलाकेति''। तत् आकर्ण्य विस्मितः मुनिः ''एतत् कथमिव ज्ञातमनया'' इति चिन्तयन् तत्र उपाविशत्।

**प्रश्नाः**

**I. एकपदेन उत्तरत -** ½×2= 1

(i) मुनिः तां गृहिणीं कथं दृष्टवान्?

(ii) ब्राह्मणगृहं गत्वा मुनिः किम् अयाचत?

**II. पूर्णवाक्येन उत्तरत -** 1×1= 1

''मुने! न अहं बलाकेति'' गृहिण्याः इदं वचनं श्रुत्वा मुनिः किम् अचिन्तयत्?

**III. प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा निर्देशानुसारं लिखत।** 1×2= 2

(i) 'श्रुत्वा' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(अ) विहस्य (ब) आकर्ण्य

(स) एत्य (द) अभाषत

(ii) 'सा विहस्य अभाषत' अत्र 'सा' इति सर्वनामपदं कस्यै प्रयुक्तम्?

(अ) बलाकायै (ब) कोपदृष्ट्यै

(स) गृहिण्यै (द) मुनये

(आ) **पद्यांशः-**

निम्ब! त्वदीय कटुता यदि दाहहन्त्री

गायन्तु मूढमनुजास्तव दोषगाथाः।

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

तप्तास्त एव तपनोपमपित्ततापैः

गास्यन्ति मित्रवर! तावकगीतकानि।।

**प्रश्नाः**

**I.** **एकपदेन उत्तरत-** ½×2= 1

(i) निम्बस्य कटुता कीदृशी भवति?

(ii) पित्तस्य तापेन तप्ताः जनाः निम्बस्य कानि गास्यन्ति?

**II.** **पूर्णवाक्येन उत्तरत-** 1×1= 1

(i) निम्बस्य दोषगाथाः के गायन्ति?

**III.** **प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा निर्देशानुसारं लिखत।** 1×2= 2

(i) 'मधुरता' इति पदस्य विलोमपदं श्लोके किं प्रयुक्तम्?

(अ) दाहहन्त्री (ब) त्वदीय

(स) दोषगाथाः (द) कटुता

(ii) ''तव दोषगाथाः'' अत्र तव सर्वनामपदं कस्मै प्रयुक्तम् ?

(अ) दोषगाथायै (ब) निम्बाय

(स) मूढमनुजाय (द) पित्ततापाय

**(इ) नाट्यांशः**

भोजः – अनुगृहीतोऽस्मि। कुतः समागमनम् अत्रभवताम्?

लक्ष्मीधरः – राजन्! यत्र जलपूर्णं सरः भवति, तत्र पक्षिणः स्वयं समायान्ति। अहमपि भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि। भवद्राज्ये निवस्तुम् इच्छामि।

भोजः – ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः। (मन्त्रिणं प्रति) मन्त्रिवर! नगरपालं समाहूय आदिश्यतां यत् स लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु। नगरे कृतनिवासम् अपठितं जनं निःसार्य तद्गृहे एष पण्डितवरः वासयितव्यः।

**प्रश्नाः**

**I.** **एकपदेन उत्तरत -** ½×2= 1

(i) यत्र जलपूर्णं सरः भवति तत्र के आयान्ति?

(ii) नगरपालः कस्मै निवासव्यवस्थां कारयतु?

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

**II.** **पूर्णवाक्येन उत्तरत -** 1×1= 1

(i) लक्ष्मीधर: भोजं प्रति किं कथयति?

**III.** **विकल्पेभ्य: शुद्धम् उत्तरं चित्वा निर्देशानुसारं लिखत।** 1×2= 2

(i) 'सर:' इति पदस्य विशेषणपदं नाट्यांशे किं प्रयुक्तम्?

| | | | |
|---|---|---|---|
| (अ) | जलपूर्णम् | (ब) | समागमनम् |
| (स) | पक्षिण: | (द) | कुत: |

(ii) ''विद्वांस:'' इति कर्तृपदस्य क्रियापदं संवादे किं प्रयुक्तम्?

| | | | |
|---|---|---|---|
| (अ) | आदिश्यताम् | (ब) | आयान्ति |
| (स) | विभूषयेयु: | (द) | वासयितव्य: |

12.

**(क) अधोलिखित श्लोकयो: अन्वये रिक्तस्थानानि पूरयित्वा अन्वयम् उत्तर पुस्तिकायां लिखत-** ½×8= 4

नृत्यामि नित्यं धवलास्तरेषु
सङ्केतिताङ्कै: प्रकटीकरोमि।
भावं जनानां हृदयेषु गूढं
कृष्णाननाऽऽलोच्य वदन्तु काऽहम्?

अन्वय:– नित्यं धवलास्तरेषु (i) .............................. जनानां हृदयेषु (ii) ............................ भावं सङ्केतिताङ्कै: (iii) ..............................। आलोच्य वदन्तु (iv) .............................. अहं का (अस्मि)?

**(ख)** शोषितो नात्र कश्चिद् भवेत् केनचित्
व्याधिना पीडितो नो भवेत्कश्चन।
नात्र कोऽपि व्रजेत् दीनतां हीनतां
मोदतां राजताम् पावनं भारतम्।।

अन्वय :– अत्र कश्चित् केनचित् (i) .............................. न भवेत्, कश्चन (ii) .............................पीडित: नो भवेत्। अत्र क: अपि दीनतां (iii) .............................. न व्रजेत्, पावनं (iv) .............................. मोदतां राजताम् (च)।

13. **रेखाङ्कितपदानां स्थाने विकल्पेभ्यः उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्नवाक्यानि उत्तरपुस्तिकायां लिखत -** 1×4= 4

(i) <u>महर्षिपराशरेण</u> वृक्षायुर्वेदः रचितः।

(अ) के (ब) केन

(स) कया (द) कैः

(ii) जलम् अन्विष्यता मुनिना <u>आह्लादकरः</u> शब्दः श्रुतः।

(अ) कः (ब) किम्

(स) कीदृशः (द) कथम्

(iii) प्रतापः <u>जयघोषं</u> श्रुत्वा लज्जाम् अनुभवति।

(अ) कम् (ब) काम्

(स) केषाम् (द) कथम्

(iv) प्रतापं निराशं दृष्ट्वा <u>भिल्लाः</u> दुखीयन्ति।

(अ) के (ब) काः

(स) कः (द) कानि

14. **अधोलिखितवाक्यानि कथाक्रमानुसारं संयोज्य उत्तरपुस्तिकायां पूर्णानि वाक्यानि लिखत।** ½×8= 4

(i) मात्रा अनुमतः अष्टावक्रः राजसभाम् अगच्छत्।

(ii) अष्टावक्रः मातरम् अपृच्छत् - मम पिता कुत्र अस्ति?

(iii) अष्टावक्रः अपि पण्डितानां व्यवहारं दृष्ट्वा उच्चैः अहसत्।

(iv) माता अवदत् - तव पिता जनकस्य सभायां शास्त्रार्थाय गतः।

(v) राजसभायां पण्डिताः अष्टावक्रस्य शरीरं दृष्ट्वा तस्य उपहासम् अकुर्वन्।

(vi) अष्टावक्रः अवदत् - अहं एतेषां पण्डितानां मूर्खतां दृष्ट्वा हसामि।

(vii) राजा अष्टावक्रम् अपृच्छत् - त्वं किमर्थं हससि?

(viii) एते न जानन्ति यद् वक्रे शरीरे आत्मा तु वक्रः न भवति।

| प्र.सं. | प्रश्न | | | | अंक |
|---|---|---|---|---|---|
| 15. | **रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** | | | 1×4= | 4 |
| (i) | हा निष्ठुर दैव। देशभक्ते तु दयस्व। | | | | |
| | (अ) निष्ठायुक्त | | (ब) कठोर | | |
| | (स) निश्चित | | (द) निराकारः | | |
| (ii) | आत्मघातिनः जनाः असूर्यान् लोकान् व्रजन्ति। | | | | |
| | (अ) आत्मज्ञानिनः | | (ब) आत्मविश्वासिनः | | |
| | (स) आत्महन्तारः | | (द) आत्मचिन्तकाः | | |
| (iii) | भारतायार्पितं मेऽखिलं चेष्टितम्। | | | | |
| | (अ) अभिलाषा | | (ब) निराशा | | |
| | (स) इच्छितम् | | (द) कर्म | | |
| (iv) | दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः। | | | | |
| | (अ) यः अधिकं वदति | | (ब) यः बहुभाषाः जानाति | | |
| | (स) यः भाषणं न करोति | | (द) यः भाषां पाठयति | | |

# आदर्श प्रश्न पत्रम्
## कक्षा - नवमी
## संस्कृत
## अपेक्षित उत्तराणि

| प्र.सं. | प्रश्न पत्र | अंक |
|---|---|---|

**खण्डः- (क) अपठित-अवबोधनम्.**

1. **प्रथम अनुच्छेद :**

**I. एकपदेन उत्तरत -** ½×2= 1

(i) कर्त्तव्यपालनम्

(ii) पृथिवी

**II. पूर्णवाक्येन उत्तरत -** 1×2= 2

(i) मानवैः स्वकीयं कर्म पूर्णनिष्ठया करणीयम्।

(ii) सूर्यः प्रतिदिनं यथा समयम् उदयम् अस्तं च गच्छति।

**III. शुद्ध-उत्तर चयनम्** ½x2= 1

(i) (अ) मानवेभ्यः (द) निस्वार्थभावेन

2. **द्वितीय अनुच्छेद :**

**I. एकपदेन उत्तरत -** 1×2= 2

(i) विद्या

(ii) समाजे

**II. पूर्णवाक्येन उत्तरत -** 1×2= 2

विद्यया एवं मानवः उचितम् अनुचितम्, करणीयम् अकरणीयं ग्राहयं त्याज्यं वा इति सम्यक् निर्णयं कर्तुं शक्नोति।

**III. शीर्षकम्** - विद्यायाः महात्वम् / अन्य कोऽपि उपयुक्ताः शीर्षकः 2

**IV. विकल्पेभ्यः** - शुद्ध-उत्तरचयनम् ½×4= 2

(i) (ब) विद्या

(ii) (अ) विन्दति

(iii) (स) जनः

(iv) (द) जनाय

## खण्डः- ( ख ) रचनात्मकं लेखनम् ( 12 )

**2. पत्रे रिक्त स्थान पूर्ति :** ½×8= 4

| | | | |
|---|---|---|---|
| (i) | नवदिल्लीतः | (ii) | भावुक |
| (iii) | लभस्व | (iv) | वार्षिकपरीक्षाः |
| (v) | प्राप्ताः | (vi) | अनन्तरम् |
| (vii) | क्रीता | (viii) | स्नेहमयी |

**3. चित्रवर्णनम् अथवा अनुच्छेद लेखनम्** 2×4= 8

मञ्जूषातः पदानां सहायतया छात्राः, स्वयंमेव चत्वारि वाक्यानि लेखिष्यन्ति।

## खण्डः- ( ग ) अनुप्रयुक्त व्याकरणम् ( 28 )

**4. उचित शब्दरूपचयनम्** ½×4= 2

क. (i) (स) राजानम् (ii) (ब) भवन्तम्

(iii) (अ) आत्मनः (iv) (ब) विद्वांसः

ख. (i) गच्छन्तौ (ii) भवतः/भवताम् 1×2= 2

**5. संख्यावाचकपदैः रिक्त स्थानपूर्ति** ½×4= 2

क. (i) (ब) एकस्मिन् (ii) (द) द्वाभ्याम्

(iii) (ब) तिस्रः (iv) (द) चतुरः

ख. (i) पञ्च (ii) एका 1×2= 2

**6. लोटलकारस्य क्रियापदप्रयोगः** ½×4= 2

क. (i) (अ) भवन्तु (ii) (द) सेवध्वम्

(iii) (ब) लभन्ताम् (iv) (अ) रोचताम्

**7. विधिलिङ् लकारस्य क्रियापदप्रयोगः** ½×4= 2

क. (i) (स) भक्षयेम (ii) (स) मोदेरन्

(iii) (स) शक्नुयाताम् (iv) (स) जानीयातम्

ख. (i) स्यात् (ii) भजन्तु 1×2= 2

**8. उचित उपपद विभक्ति** ½×8= 4

(i) (अ) ग्रामम् (ii) (द) नगरम्

(iii) (स) परिश्रमेण (iv) (ब) विवादेन

(v) (स) रावणाय (vi) (स) सोमवासरात्

| | | | | |
|---|---|---|---|---|
| (vii) (द) कवीनाम् | (viii) (स) पुत्रे | | | |

9. **मञ्जूषातः पदानि चित्वा वाक्यपूर्तिः** 1×4= 4

| | | | |
|---|---|---|---|
| (i) | उद्यानम् | (ii) | कमलैः |
| (iii) | भ्रमणात | (iv) | ईश्वरे |

10. **उचित प्रत्ययान्त पद चयनम्** ½×8= 4

| | | | |
|---|---|---|---|
| (i) | (ब) खदितानि | (ii) | (ब) कृतवन्तौ |
| (iii) | (अ) पतन्तः | (iv) | (स) सेवमानः |
| (v) | (ब) रचिताः | (vi) | (ब) पठितवती |
| (vii) | (स) हसतः | (viii) | (स) गच्छन्त्यः |

10. **ख.**

(i) पश्यन् (ii) पठितम् 1×2= 2

## खण्डः- (घ) पठित-अवबोधनम्. (28)

11. **अ गद्यांशः**

**I. एकपदेन उत्तरत -** 4

(i) कोपदृष्ट्या ½×2= 1

(ii) भिक्षाम्

**II. पूर्णवाक्येन** 1×1= 1

इदं वचनं श्रुत्वा मुनिः "एतत् कथम् इव ज्ञातम् अनया" इति अचिन्तयत्।

**III. निर्देशानुसारम् उत्तरम्** 1x2= 2

(i) (ब) आकर्ण्य

(ii) (स) स गृहिण्यै

**आ पद्यांशः** 4

**I. एकपदेन उत्तरत -** ½×2= 1

(i) दाहहन्त्री

(ii) गीतानि

**II. पूर्णवाक्येन उत्तरत -** 1×1= 2

मूढमनुजाः निम्बस्य दोषगाथां गायन्ति।

**III. निर्देशानुसारम् उत्तरत्** 1x2= 2

(i) (द) कटुता

(ii) (ब) निम्बाय

**( इ ) नाटयांशः** **4**

**I. एकपदेन उत्तरत -** ½×2= 1

(i) पक्षिणः

(ii) लक्ष्मीधरविदुषे

**II. पूर्णवाक्येन उत्तरत्** 1×1= 1

लक्ष्मीधरः भोजं प्रति कथयति यत् सः भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतः। भवद्राज्ये निवस्तुम् इच्छति।

**III. निर्देशानुसारम् विलक्प चयनम्** 1x2= 2

(i) (अ) जलपूर्णम्

(ii) (स) विभूषयेयुः

12. **अन्वये रिक्त स्थानपूर्तिः** ½×8= 4

(i) नृत्यामि (ii) गूढं

(iii) प्रकटीकरोमि (iv) कृष्णानना

ख.

(i) शोषितः (ii) न्याधिना

(iii) हीनतां (iv) भारतम्

13. **प्रश्ननिर्माणम्** 1x4= 4

(i) (ब) केन (ii) (स) कीदृशः

(iii) (अ) कम् (iv) (अ) के

14. **घटनाक्रम वर्णनम्** ½×8= 4

(i) अष्टावक्रः मातरम् अपृच्छति ..........................................................................

(ii) माता अवदत् - तव पिता ..........................................................................

(iii) मात्रा अनुमतः अष्टावक्र ..........................................................................

(iv) राजसभायां पण्डिता: .................................................................................

(v) अष्टावक्र: अपि पण्डितानां व्यवहारं .................................................................................

(vi) राजा अष्टावक्रम् अपृच्छत् .................................................................................

(vii) अष्टावक्र: अवदत् ............ अहं एतेषां .................................................................................

(viii) एते न जानन्ति यद् .................................................................................

**15. प्रसङ्गानुसारम् अर्थ-चयनम्** 1x4= 4

(i) (ब) कठोर

(ii) (स) आत्महन्तार:

(iii) (स) इच्छितम्

(iv) (अ) य: अधिकं वदति